भगवद्वरिवस्या

बुद्धिसागरपराजुलिः

१६२
६८३१
३६६

~~३८६~~

ड.पु.११८

दे ७ ६४०३१

भगवद्वरिवस्या

[श्रीलक्ष्मीनारायणमानसपूजात्मिका]

रचयिता:-

बुद्धिसागरपराजुलिः

प्रकाशिका:–
राधिका पराजुली
महाराजगञ्ज ।

२०३२ मा पहिलोपल्ट ५०० प्रति

मूल्य:– ४।–

मुद्रक
लुष प्रेस
पुल्चोक, ललितपुर ।

प्रकाशकीय

मेरा आराध्य पतिदेव बुद्धिसागर पराजुलीज्यूका कृतिहरू छपाउने छु भन्ने कुरा 'करुणविंशोत्तरी' छपाउँदा लेखेकी थियें तर कागतको भाउ छापाखानाको ज्याला इत्यादि आज भन्दा भोलि भोलि भन्दा पर्सि महंगिदै गएको देखेर कन् कन् मनमा डर लागेको छ । विद्वान्का कृतिहरू छपाएर देशको सम्मान बढाउनु सबैको साझिया काम हो तर नेपालको स्थिति र नेपालीको अवस्था देख्दा यो काम हुन धेरै पर जस्तो लाग्छ । जे होस् मेरो रहर विस्तारै ईश्वरले पुऱ्याउला, किनभने यो आफ्नो फेशनको रहर हैन सिंगारको रहर हैन, लत्ता कपडा गहना गुरियाले ढल्ने रहर हैन हो के त भने जन्मभूमिलाई जन्मभूमिको संस्कृतिलाई नेपाली जातिलाई गौरवान्वित गराउने रहर हो, हुनत यो सानो कुरा हो तर नेपाली जातिका लागि सधवाको शिरको ताजा सिन्दूरको टीका जस्तो हो ।

जसो तसो गरी यो 'भगवद्वरिवस्या' भन्ने भगवान् श्रीनारायणको मानसराजोपचारपूजा साधक उपासक आराधक एवं चिन्तनशील सबैलाई उपयोगी होला भनेर छपाएकी छु । यसमा मेरा घरमा पुर्खाहरूले राखिएको राष्ट्र र राजालाई उपयुक्त गोपनीय विधानको शास्त्रोक्त रेखा साथै छपाएकी छु र र भदीमा खेतमा हरेलो किन गर्छन् यसबारे मन्डकी अञ्चल

तिरको परंपराको मूलरूप संगै दिएकी छु। प्रायः नेपालीको बहुचर्चित कुलदेवताबारे एउटा विधि दिएकी छु। यो पनि एक उपलब्धि नै हो। यसका चक्र सम्बन्धी कुराहरू विद्वान्-हरूलाई पनि आकर्षण हुने छन्। किनभने यो नेपाली संस्कृतिमा एउटा प्रस्तुतीकरण मात्र हो र एउटा संस्कृतिका अनुसन्धानकर्ता विद्वान्को एक सानो झिल्को सम्म हो।

यो आकासको उडान जस्तो केवल कल्पना हैन, कुनै युवक युवतीको युगल गीतजस्तो जनसाधारणको रमाइलो कुरा पनि हैन तापनि राष्ट्रको एक उज्ज्वल रत्न हो भन्ठानेर छपाएकी हूं, मेरा धारणाको पारख पाठकहरूले गर्नुहुनेछ। यसको जे जस्तो स्थान होला सो कुरा पाठक वर्गमा नै रहेको छ भनी यसैगरी अरू पनि पुस्तक प्रकाश गर्न सकूं भनी भगवान्सग विन्ति गर्दै यसबारे यहीं बिसाउँछु।

विद्वान्हरूकी सेविका
राधिका पराजुली
२०३२ कार्तिक लक्ष्मीपूजा

-□-

दर्ता नं - ६४[illegible]२१.

बा. व्या. पु.

भूमिका

श्रीमतो जगन्नियन्तुः परमेश्वरस्य चिन्तनं रूपद्वयेन कर्तव्यमिति शास्त्रीयोभिप्रायः। एकं रूपं ध्येयम् अन्यज् ज्ञेयम्, ध्येयं च रूपं स्वस्वकुलागमगुरूपदेशपरंपरोक्तपद्धत्यनुरूपं विविधश्रुतिस्मृत्यागमपुराणादिनिवन्धनं नानाविधं सर्वैः स्वीक्रियते । तत्र ध्येयरूपेष्वन्यतमम्–सरस्वतीतीरवासिभृगुप्रभृतिसकलमुनिजनसिद्धान्तप्रसिद्धमाहात्म्योऽवज्ञाकृष्टकुसुमायुधसौन्दर्यसर्वस्वः कमलाकुचतटीपत्रभृङ्गो भगवान् श्रीमान् नारायणो वा मनागवलोकनखर्वीकृतमदनगर्वो मुग्धमृगलाञ्छनशेखरः श्रीशङ्करो वा ।

तत्राऽस्माभिर्विरचिता पाठकानां पुरतः प्रस्तुता सेयं श्रीभगवद्वरिवस्या" श्रीमतो नारायणस्य ध्येयप्रकाण्डस्य संचिन्तनमुखेन स्वान्तःसुखाय लोकहिताय सतीमतल्लिकायाः स्वपत्न्याः श्रीराधिकायाः प्रगाढोत्कण्ठापूरणाय च प्रकाशमुपनीता ।

ब्रह्म-नारद–ब्रह्मर्षि–प्रह्लाद–ध्रुव – बलि–विभीषण–पृथु–पार्थ–पराशर–पुण्डरीक–व्यासाम्बरीष– शुक–शौनक– भीष्मादिभिराचरिते भक्तिमार्गे जिगमिषुरहं निर्मलमरीचिगौरं स्वच्छाऽच्छशरदाकाशमहानगरपौरं क्षौमगृहच्छन्नयुवतिजनमनश्चौरंचन्द्रं निर्मेघनभोमण्डले लम्बयित्वा स्थापितविमलनवनीतमहामोदकमिव

मत्वा आदातुमुत्सुक उद्बाहुर्बाल्यव्यामुग्धबुद्धिर्गुरुजनमनोमोदकारी बालक इव भक्तिमार्गप्रौढविद्वद्वृन्दहास्याऽऽधायकोऽवश्यं भविष्यामि, तथापि भक्तिमार्गपथिकपथानुसरणकारी अहं भागवतीं कृपां लब्ध्वा कृतार्थो भविष्यामीति भृशं विश्वसिमि। स्वेष्टदैवतसेवनं परमपुरुशार्थ इति साम्राज्यलहरीभूमिकायामस्माभिः प्रपञ्चितम्। सोऽयं प्रपञ्चो ध्येयरूपस्य। ज्ञेयरूपस्य चर्चा नेपालराष्ट्रियभाषायां विरचिते दर्शनामृतनामके पुस्तके विहिता।

अत्रायमप्युल्लेखनीय एको विशेषः- तान्त्रिकपरंपरासु अजपाजपसंख्या प्रायेण सर्वत्र २१६०० निश्चिता, परन्तु वेदविद्या परिशोलनपराणां श्रौतस्मार्तकर्मधुरीणानां तदनकूलसदाचाराणां विदुषामनुभूतौ तु अहोरात्रयोरजपाजपनामा प्राणापानरूपो निश्वासोच्छ्वासात्मको जपः १०८०० परिमितः। तथा च माध्यन्दिनानां शतपथब्राह्मणेन संख्यामादाय"तदेष श्लोकोऽभ्युक्तः-

श्रमादन्यत्रपरिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि।
अहोरात्राभ्याँ पुरुषः समेत कतिकृत्वः प्राणिति चायच्चानितीति॥

तदेष श्लोकः प्रत्युक्तः-

शतं शतानि पुरुषः समेनाष्टौ शता यन्मितं तद् वदन्ति॥
अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चापचानितीति॥"

(शतपथ ब्राह्मण, काण्ड १२, अध्याय ३, ब्राह्मण २)

इत्येवंरूपेण आम्नातम्। तदित्थं वैदिकीं मर्यादामनुसरन्तो वयं तदनुरूपामेवाजपाजपसंख्यां स्वीकुर्महे, स्मृत्यपेक्षया श्रुतेः प्राबल्यात्। अत एव अस्यां वैष्णव्यां वरिवस्यायां श्रीसपर्यामृते च एष एव पक्षः स्वीकृतः। अतएव वैदिकेभ्योऽयं पन्था अवश्यं रोचेत। यद्येनां कश्चिद् विस्तरणोऽनुसंचित्सेत्स सद्य एव प्रकाशमेष्यन् मद्विरचितं श्री 'समपर्यामृतं' सम्यगवेत्य यथायथं वैष्णवागमानुरूपमूहापोहं विधाय कुर्यात्। इत्थं

वरिवस्या सूत्रं, श्रीसपर्यामृतं विस्तृतव्याख्यानम् । अत्राधिकं किं ब्रूमः करतले पुस्तकं समागच्छदेवास्ति । प्रज्ञामान्द्याद् इन्द्रिया-पाटवाद् भ्रमवशाद् वा अत्र भवेयुर्दोषास्तथापि दोषज्ञाः सन्तः स्वयं समाधाय मामपि सूचयिष्यन्ति । अनेन वाग्व्यापारेण भगवान् परमेश्वरः श्रीमान् आदिनारायणः सदा सुप्रसन्नो भूयादिति प्रार्थयन् विरमति

बुद्धिसागरः

—०—

दर्ता नं - ६४०३९
बा. क्या. पु.

श्रीः

विद्वत्तल्लज बुद्धिसागर कवे काव्यं त्वदीयं नवं
लब्ध्वा भूरिगुणं दधाति नितरां चेतो मदीयं मुदम् ।
प्राज्याः संप्रति पाठनादिविधयः कुर्वन्ति मां व्याकुलं
संप्राप्तेऽवसरे सविस्तरमहं द्रक्ष्यामि काव्यं नवम् ।।

नयराजः पन्तः

२०३२ वैक्रमाब्दे सौरस्य चैत्रस्य
चतुर्थे दिवसे बुधवासरे

दर्ता नं ६८४/३१
वा.व्या.पु.

श्रीः

ॐ नमः परस्मै ब्रह्मणे

ॐ नमो नारायणाय श्रीसमन्विताय

श्रीगणेशाय नमः

जागरणप्रार्थना–

हे नारायण सूतमागधकृतं प्राभातिकं मङ्गलं
संगीतध्वनिसंकुलं सुमधुरं वाद्यैः समं वल्गितम् ।।
श्रुत्वा जागृहि जागृहि प्रमुदितः प्रेम्णा जगल्लोकय
मां दिष्टेन समाकुलं शुभदृशा पीयूषवत्सेचय ।।

(१)

जागरितस्य नीराजना–

वासो रात्रिधृतं विहाय चरणौ पाणी च संशोधयन्
अन्तर्मन्दिरमासनं प्रणिहितोऽधिष्ठाय भक्त्या नमन् ।।
पात्रे रत्नमये निधाय रुचिरं कर्पूरमादीपयन्
कुर्वे तोरणदुन्दुभिध्वनियुतां नीराजनां ते पदोः ।।

(२)

शिरसि सहस्रारकमले गुरुचिन्तना–

शीर्षे स्वच्छतमे सहस्रदलके पद्मेऽस्ति या कर्णिका
तन्मध्ये परिचिन्तये रविदलं पद्मं लसत्कर्णिकम् ।।
तद्बिन्दौ सितगन्धमाल्यवसनं श्वेतं गुरुं चिन्तये
शक्त्यालिङ्गितमिन्द्रियार्थजयिनं नारायणाभं शिवम् ।।

(३)

चक्रेषु सप्तपुरीभावना :-

मूलाधारकमाकलय्य मनसा तत्राप्ययोध्यापुरीं
स्वाधिष्ठानमथो विचिन्त्य मथुरां मायां पुरीं पूरकम् ।।
काश्यानाहतमाकलय्य च विशुद्धौ चिन्तये काञ्चिका-
माज्ञामुज्जयिनीयुतां स्वशिरसि द्वारावतीं चिन्तये ।।

(४)

सहस्रारस्थरत्नभूमौ श्रीनारायणचिन्तना :-

ध्यात्वा रत्नमयीं भुवं दशशतैः पत्रैर्युते पङ्कजे
शीर्षे योगविभावितेऽतिमहिते श्रीब्रह्मरन्ध्रे परे ।।
विद्युद्दामसमश्रिया त्र.लसितं नारायणं शर्मदं
स्वासीनं सुमनोहरं शुभघनश्यामं सदा भावये ।।

(५)

तत्रैव सूर्यचन्द्राग्निमयपीठे लक्ष्मीचिन्तना-

मार्तण्डेन्दुकृशानुपीठलसितां निष्टप्तहेमप्रभां
पिञ्जर - पद्मां पद्मपराग — तनुं क्षौमाम्बरां सुस्मिताम् ।।
दानाभीतिसरोरुहद्वयधरां युग्मद्विदन्त्युद्धृत-
कुम्भक्लिन्नकिरीटकां हृदि दधे नारायणप्रेयसीम् ।।

(६)

चक्रेषु नानारूपलक्ष्मीचिन्तना -

मूलाधारे गुह्यभागे च नाभौ
वक्षोदेशे कण्ठमध्यस्थले च ।।
भ्रूयुग्मान्तर्ब्रह्मरन्ध्राख्यचक्रे
बिन्दौ देव्यः पान्तु विष्णुप्रियास्ताः ।।

(७)

देवीं हिरण्यप्राकारां मूलाधारे विचिन्तये ।
आर्द्रां देवीं गुह्यभागे ज्वलन्तीं नाभिमण्डले ।।८।।

6839

देवीं वक्षःस्थले तृप्तां तर्पयन्तीं च कण्ठगाम् ।
भ्रूयुग्मान्तः पद्मसंस्थां ततोऽपि ब्रह्मरन्ध्रगाम् ।।९।।
पद्मवर्णां सदा ध्याये, विन्दौ श्रीपरमेश्वरीम् ।
अर्धनारायणतनुं चिन्तयेऽवहितः स्वयम् ।।१०।।

चक्रोद्घाटनाप्रार्थना–

श्रीविष्णोः श्रवणादिके भवभयोच्छित्त्यै सदा साधकैः
कार्ये योगविधौ समापतति यःप्रत्यूहसंघो महान् ।।
तं दूरादपसार्य कुण्डलिनिका जागर्ति युक्ता यथा
युञ्जाने दिशतात्तथा मयि रमा यौगीं समुद्घाटनाम् ।।

(११)

कुण्डलिनीध्यानम्–

श्यामां कुण्डलिताहिभां वलयितां सार्धत्रिवारं भृशं
सूक्ष्मां सद्विसतन्तुभां त्रिभुवनं श्यामं दधानां त्विषा ।।
विद्युत्कोटिनिभां स्वदैवतमयीमाब्रह्मरन्ध्रान्तरं
ध्याये कुण्डलिनीं सदा विलसितामामूलतः सिद्धिदा[म्] ।।

(१२)

कुण्डलिन्युत्थापनं सामरस्यभावना च–

ॐ हूं हंस इति स्मरन् मनुमिमं देवीं सुषुम्णापथा–
दुत्थाप्य क्रमशस्तथैव शनकैश्चक्राणि षड् भेदयन् ।।
तां प्रापय्य समाहितेन मनसा श्रीब्रह्मरन्ध्रान्तरं
तत्साहस्रदलान्तरे भगवता साम्ये स्थितां भावये ।।

(१३)

चक्रे देवतातर्पणं कुण्डलिन्यवरोहणं च–

तत्रोत्पन्नसुधारसेन मधुना संप्रीणयन्देवतां
कालं कंचन भावयामि मनसा तत्र स्वकीयं लयम् ।।

पश्चात् कुण्डलिनीं सुधाद्रवमयीं नीचैरवारोहयन्
सोऽहं मन्त्रमिमं समाहितमनाः संचिन्तयेऽहं शनैः ।।

(१४)

कुण्डलिन्या अवरोहक्रमो मूलाधारे स्थापना च-

विन्दुं नादमथाज्ञया विलसितं चक्रं विशुद्धचाह्वयं
स्वान्तेऽनाहतमाकलय्य मनसा यं बीजमाधूसरम् ।।
नाभिस्थं मणिपूरकं सुललितं लैङ्गं शुभाधिष्ठितं
मूलाधारमथामृतेन शनकैः संप्लाव्य तां स्थापये ।।

(१५)

कुण्डलिनीवन्दना :-

शुद्धां स्वच्छतनुं प्रकाशसुषमामाद्ये प्रयाणे ततः
पीयूषोल्लसितां सुधास्रुतिकरीं स्वीये प्रयाणेऽखिले ।।
सौषुम्णीं सरणीं समाहिततया निर्वाधमातन्वतीं
नित्यानन्दविजृम्भितां प्रतिपदं कांचित् प्रपद्येऽवलाम् ।।

(१६)

मन्त्रयोगः —

मूलादाहृदयं शिखाविलसितं जाग्रद् विशुद्धं शुभं
वाक्कूटं परिचिन्तयेऽग्निवलये सौदामिनीभास्वरम् ।।
आज्ञाव्याप्तशिखं स्फुरद्दिनकराभासं तथानाहते
स्वप्नस्थं स्मरराजकूटमतुलं वैवस्वते मण्डले ।।

(१७)

आज्ञायां शशिमण्डले शशिनिभं श्रीब्रह्मरन्ध्रस्थित -
चिच्चन्द्राप्तशिखं सुषुप्तिलसितं श्रीशक्तिकूटं श्रये ।।
आमूलादुदितार्ककोटिसदृशीमाब्रह्मरन्ध्रान्तरं
तेजोदण्डमयीं तुरीयदशकां ध्याये परां देवताम् ।।

[१८]

हृत्पद्मं शुभमासनं दशशताराम्भोरुहान्निर्गतं
पीयूषं परिकल्पयामि पदयोः पाद्यं मनोर्घ्यं ददे ।।
पीयूषेण समर्प्य साचमनकं स्नानं ह्युपस्पर्शनं
तत्त्वं नाभसमंशुकं च तिलकं स्याद् गन्धतत्त्वात्मकम् ।।

[१९]

चित्पुष्पं स्वमनस्तु धूपमतुलं तत्त्वं तथा तैजसं
दीपं देवसुधाम्बुधिं तव कृते नैवेद्यमाकल्पये ।।
कृत्वानाहतघोषमेव मधुरं घण्टाध्वनिं चामरे
सुश्वेते परिवीजयामि भगवन् द्वे वायुतत्त्वेन ते ।।

[२०]

नृत्यं चेन्द्रियकर्मभिर्विरचये लास्यं तथा ताण्डवं
चाञ्चल्येन मनोगतेन कलये नाट्यं च नानाविधम् ।।
मायाहंकृतिरागमोहमदमात्सर्याख्यदम्भद्रुहा–
लोभक्षोभविरुद्धभावबहलैः पुष्पैः सदा पूजये ।।

[२१]

ज्ञानं भूतदया क्षमेन्द्रियदमोऽहिंसा च भावैरिमान्
हे नारायण पादयोर्विनिदधे पञ्चैव पुष्पाञ्लीन् ।।
मुद्राद्रव्यमथो कुलामृतमिदं त्वत्पीठशुध्यै ददे
कामक्रोधबलिं विधाय विधिना तृप्तं भवन्तं भजे ।।

[२२]

अन्तर्याग :–

हे नारायण मानसं स्रुवमथो कृत्वा सुषुम्णां स्रुचं
मिथ्याहंकृतिलोभमोहमदमात्सर्याभिधानं हविः ।।
सक्रोधं परिकल्पये पिशुनतायुक्तं स्वमूलाधृतौ
वन्हिं कुण्डलिनीं प्रदीप्य विपुले कुण्डे चतुष्कोणके ।।

[२३]

मूलोच्चारणपूर्वकं हृदि सदा त्वां देव संचिन्तयन्
सौषुम्णस्रुचि साक्षवृत्ति मनसा गृह्णन् स्रुवेण स्वयम् ।।

धर्माधर्महविः समन्वितमिदं सर्वं तव प्रीतये
स्वात्माग्नौ सततं जुहोमि भगवन् पूर्णाहुतिं चान्ततः ।।
(२४)

मन्त्रजपः प्रातस्तुतिश्चः—

त्वां नारायण नित्यतृप्तमपि मद्धोमार्चनाऽऽप्यायिता
ध्यात्वा पाणिमुखाङ्घ्रिमार्जनकृते दत्त्वा जलं प्रोच्छयन् ।।
गायत्रीसहितं जपँस्तव मनुं त्वद्दक्ष हस्तेऽर्पयन्
त्वत्प्रातःस्तुतिमातनोमि मधुरां वेदोपवेदोद्गताम् ।।
(२५)

अजपासमर्पणम्-

आधारे कनकप्रभे वशषसैर्वर्णैः समुज्जृम्भिते
पद्मे वेददले स्थितं गणपतिं पाशाङ्कुशालङ्कृतम् ।।
हस्त्यास्यं तरुणं वराभयकरं ध्यात्वा त्रिनेत्रारुणं
तस्मै संप्रददेऽजपाजपमिमं त्रिघ्नं शतं संख्यया ।।
(२६)

धातारं व- भ- मैस्तथा च य-र-लैर्युक्ते महाम्भोरुहे
षट्पत्रे नवसूर्यभेऽनलनिभं ध्यात्वा चतुर्दिङ्मुखम् ।।
स्वाधिष्ठानपतिं वराभयलसत्सत्कुण्डिकामालिका-
हस्तं संप्रददेऽजपाजपमिमं तस्मै सहस्रत्रयम् ।।
(२७)

डोढोर्णस्त-थ- दा ध-नावपि प-फावेभिर्युते स्वक्षरैः
पद्मे पङ्क्तिदलेऽर्ककोटिसदृशे सत्कर्णिके श्रीहरिम् ।।
ध्यात्वाऽथो अरि-पाञ्चजन्य-नलिनी-कौमोदकीसंयुतं
तस्मै श्रीमणिपूरकेऽर्पितमिदं जाप्यं सहस्रत्रयम् ।।
(२८)

कः खो गो घङचाश्छजोझ्ञटठा एभिर्युतेऽब्जेऽनिले
तत्त्वेऽनाहतचक्रके स्फटिकभं गौरीयुतं शाश्वतम् ।।

खट्वाङ्गाजगवत्रिशूलडमरून् हस्तैर्दधानं शिवं
ध्यात्वा संप्रददेऽजपाजमिमं तस्मै सहस्रत्रयम् ।। ५

(२६)

तत्त्वे व्योमनि षोडशस्वरयुते पत्रैः कलासंख्यकैः
संयुक्ते कमले निविष्टमनघं चक्रे विशुद्धे परे ।।
जीवं दीपशिखानिभं समतनुव्याप्तं त्रिधामाऽऽस्पदं
ध्यात्वा संप्रददेऽजपाजपमिमं तस्मै सहस्रार्धकम् ।

(३०)

आज्ञायां भ्रुवि ह-क्षवर्णसहिते पद्मे द्विपत्रे मन-
स्तत्त्वे स्वे निजमाययाऽऽवृततनुं शिष्यानुकम्पापरम् ।।
मुद्रापुस्तवराभयान्वितकरं द्वैविद्यशक्तिं गुरुं
ध्यात्वा संप्रददेऽजपाजपमिमं तस्मै सहस्रार्धकम् ।।

(३१)

आदिक्षान्तसमस्तवर्णसहिते पद्मे सहस्रारके-
ऽधोवक्त्रेऽब्जसहस्रशीतलतनुं कोटीतडिद्भास्वरम् ।।
नित्यानन्दमनन्तमात्मविलसत्सच्चित्फुरत्तात्मकं
ध्यात्वाऽस्मै परमात्मनेऽर्पितमिदं जाप्यं सहस्रार्धकम् ।।

(३२)

योऽयं मन्त्रजपोऽजपाजपमयः स्वोच्छ्वासनिश्वासगः
पूर्वप्रातरिनोदयादनु तथा चाद्योदयात् पूर्वतः ।।
अष्टाभिश्च शतैर्युतो दशसहस्राढ्यः सदा संख्यया
तेनाऽयं भगवन् प्रसीदतु महायोगेश्वरः श्रीपतिः ।।

(३३)

हंसरूपध्यानम्-

पक्षौ सूर्यनिशाकरौ त्रिनयनं विन्दुः शिरस्तारकं
रुद्रो यस्य मुखं शिवोऽङ्घ्रियुगलं कालानलः पार्श्वयोः ।।
सोऽयं भास्करोटिकान्तिसदृशो हंसो जगद्व्यापको
नित्यानन्दमयो हृदम्बुजमये नीडे सदा भाव्यताम् ।।

(३४)

हंसगायत्री-तुरीयपादजपः- अंजपासंकल्पश्च:—

गायत्रींचरणं तुरीयममलं जप्त्वा सहस्रान्वितं
नत्वा श्रीपरमात्मपादयुगलं पद्मालयावन्दितम् ॥
संकल्पं विधिनाऽजपाजपविधेः कृत्वा सदा भावयन्
आत्मानं परदेवतामयमहं कुर्वे क्रियां दैनिकीम् ॥

(३५)

शौचादिक्रिया-

मैत्रं कर्म विधाय पाणियुगलं पादौ च संशोधयन्
कुर्वन्नाचमनं जलेन विधिना संस्रावयन् वारि च ॥
संस्पृश्येन्द्रियवर्गमङ्गसहितं देवात्मकं भावयन्
आत्मानं विदधे निरहंसमहं ब्रह्मत्वसिद्धयुन्मुखम् ॥

(३६)

मानसस्नानम्—

कोटीसूर्यसमप्रभं शुभतनुं भूषायुधालंकृतं
श्रीविष्णुं स्वशिरःस्थितं दशदिशो विद्योतयन्तं स्मरन् ॥
तत्पादाम्बुजनिर्गतेन विशता श्रीब्रह्मरन्ध्रान्तरं
स्नानं मानसमातनोम्यवहितो गङ्गाजलेन स्वयम् ॥

(३७)

बाह्यस्नानम्-

मृत्स्नां गोमय-भस्म-दर्भ- कुसुमं कृष्णांस्तिलाँश्चाक्षतान्
धौतं वस्त्रमथांशुकं सकरकं स्नानीयमावश्यकम् ॥
सज्जीकृत्य तटे निधाय विमले गङ्गादिनद्युत्तमे
त्वत्प्रीत्यै भगवन् करोमि विधिना स्नानक्रियां वैदिकीम् ॥

(३८)

मन्त्रस्नानम्-

आकृष्याङ्कुशमुद्रया दिनकरात् सर्वाणि तीर्थान्यपि
गङ्गासिन्धुसरिद्वरादिसहितां श्रीतीर्थशक्ति स्मरन् ॥

ह्रीँ वँ हुँ फडिति स्वमूलसहितं मन्त्रं समुच्चारयन्
मन्त्रस्नानविधिं दधे तव मुदे स्वैः कुम्भमुद्रादिभिः ।।

[३९]

वस्त्रतिलकादि—

स्नात्वैवं विमलं जलं करवरे गोकर्णमुद्रायुते
कृत्वाऽऽचम्य हरिं स्मरन् स्वहृदये गृह्णन् ऋचं वैष्णवीम् ।।
उत्तीर्याथ तटेंऽशुकं परिदधज् जङ्घोरुपाण्यादिकं
मार्जन्नाचमनं विधाय तिलकं कुर्वे स्वकल्पादृतम् ।।

[४०]

संध्यावन्दनादि-

श्रीपर्णादिविशुद्धकाष्ठरचिते दर्भास्तृते स्वासने
नेपालोद्भवकम्बलाद्युपवृते भद्रासने संवसन् ।।
स्वाचान्तः कुशपाणिरर्घममलं क्षिप्त्वोर्ध्वमर्कोन्मुखः
सावित्रीमृचमाजपामि रविगं त्वां देव संचिन्तयन् ।।

[४१]

ब्रह्मयज्ञस्तर्पणं च-

वाह्वृच्यं यजुरङ्गवर्गसहितं सामाप्यथर्वाभिधं
वेदाँस्ताँश्चतुरोऽप्युपाङ्गसहितान् विद्येतिहासान्वितान् ।।
स्थित्वाऽधीत्य समाहितेन मनसा ब्रह्माख्ययज्ञं चरन्
वैधं पैतृकतर्पणं च रचये दर्भैस्तिलैः साम्बुभिः ।।

[४२]

वैतानिकौपासनादिक्रियाः पूजासंकल्पो भूतशुद्धिर्न्यासादिकं च—

कृत्वौपासनसेवनं स्ववहितो निर्गत्य पत्न्या सह
गोदुग्धाज्यकरीषदर्भवहलेवैतानिके मण्डपे ।।
गत्वाऽध्वर्युसमन्वितोऽग्निषु शुभा हुत्वाऽऽहुतीः संयत-
स्त्वत्प्रीत्यै भगवन् करोमि विधिवत् त्रेताऽग्न्युपस्थानकम् ।।

[४३]

सम्भ्रे विश्रमणं विधाय विधिवत् कृत्वा गवोपस्थितिं
भस्मस्थानमुपेत्य विष्णुहृदयं स्मृत्वा ऽर्चनामन्दिरम् ।।
गत्वाध्युष्य शुभासनं प्रणिहितः संकल्प्य पूजां तव
कुर्वे भूतविशोधनं वपुषि च न्यस्यामि वर्णावलिम् ।।

[४४]

शं मूले हृदि रं स्वरं विधुयुतं तुर्यं भ्रुवोरन्तरे
श्रींकारं कमलाप्रियप्रियमनुं विन्यस्य शीर्षोपरि ।।
ताँस्तान् वैष्णवशास्त्रवर्णितमनून् न्यस्यन् यथा दैवतं
स्वे देहे परिकल्पयामि भगवन् धर्मादिभिः पीठकम् ।।

[४५]

आधारशक्तिपीठपूजादि-

स्वे देहे प्रणवात्मके सुविमलामाधारशक्तिं महा-
भेकं कूर्ममनन्तकोलधरणीः संचिन्तयेऽनुक्रमात् ।।
तानिष्ट्वाष्टदलं प्रकल्प्य कमलं तत्पूर्वपत्रक्रमात्
कुर्वे वैष्णवपीठशक्तियजनं नारायणप्रीतये ।।

[४६]

तत्पीठे प्रथमं समर्च्य विमलामुत्कर्षिणीं तत्परं
ज्ञानाख्यां तदनुक्रियां स्ववहितो योगां तथा प्रह्विकाम् ।।
सत्यां तत्परतः सदाशिवयुतामीशानशक्तिं ततो
मध्येनुग्रहनामिकां भगवतीं श्रीपीठशक्तिं यजे ।।

[४७]

आन्तरपूजा-

प्राणायामविजृम्भिते हृदि महापद्मे लसत्कर्णिके
दत्वा विष्टरमात्मरूपहरये श्रीयोगपीठात्मने ।।
पाद्यार्घ्याचमनादिभिः स्वमनसा संकल्पितैः पूजये
देहे ऽस्मिन् प्रणवात्मके मनुमयं नारायणं त्वां स्मरन् ।।

[४८]

बाह्यपूजारम्भ :-

दीपाद् दीपान्तरमिव शुभश्वासमार्गाद् भवन्तं
पाणौ पुष्पाञ्जलिविलसिते स्थापयन् ध्यानगम्यम् ।।
सम्यक् पुष्पाञ्जलिमपि हरे पीठमध्ये निधाय
वाह्यां पूजां रचयितुमहं देवदेवोद्यतोऽस्मि ।।

[४९]

ध्यानम्—

प्रोद्यत्प्रद्योतनमणिरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च युक्तम् ।।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ।।

[५०]

ध्यानपुष्पाञ्जलि :-

देवेश त्वाममृतनयनं संमुखं कर्तुकामो
मूलं साष्टाक्षरवरमनुं संजपन् सावधानः ।।
पाणौ पुष्पाञ्जलिमभिनवं पञ्चवारं गृहीत्वा
त्वत्पादाब्जे ध्वजकुलिशसल्लाञ्छने निक्षिपामि ।।

[५१]

शालग्रामशिलाचिन्तना :-

लक्ष्मीनारायणमयशिलामूर्तिमध्ये वसन्तं
श्रीगण्डक्याः सुविमलजलोद्भिन्नचक्रे लसन्तम् ।।
विष्णुं त्वा ऽहं भवदवसुधासारसंपातहेतुं
यक्ष्ये भक्त्या वहुविधविपद्वार्धिनिस्तारसेतुम् ।।

[५२]

आवाहनादिमुद्रा :—

आयाह्यत्र प्रतिष्ठितो भव हरे त्वं संनिधेहि प्रभो
पीठेऽस्मिस्तव संनिरोधनमथो भूयाद्वागुण्ठनम् ।।
सामुख्यं सकलीकृतिर्भवतु ते मुद्राभिराभिर्हरे
पीयूषीकरणं भवेच्च परमीकारः सदा पूजने ।।

[५३]

षडङ्गन्यासादि :-

अर्चायां हृदयं शिरः शुभशिखां वर्माक्षि चास्त्रं यजे
मन्त्रन्यासषडङ्गदैवतयुतं नारायणप्रीतये ।।
यत्प्रीतिः पुरुषार्थसिद्धिरतुला दौर्भाग्यतूलानिला
पापारण्यदवानला परिणता भाग्योदधौ चन्द्रिका ।।

[५४]

मन्दिरम्—

सौधं शुद्धं विशदसुधया वैजयन्तीमनोज्ञं
चूडोत्तुङ्गं मणिशवलितं रत्नभूभित्तिरम्यम् ।।
मुक्ताजालीललितमतुलं दिव्यमुल्लोचकान्तं
नानासंपल्लसितमतुलं प्रीतये तेऽर्पयामि ।।

[५५]

वेदि :-

रम्भास्तम्भैः शुभकिसलयैः पुष्पमाल्यैः प्रवीता
दिक्कोणस्थैर्ललितललितैः स्वर्णकुम्भैरुपेता ।।
वेदी रम्या कनकरचिता रत्नरश्म्युज्ज्वलेयं
देव प्रीत्यै तत्र विरचिता मन्दिराभ्यन्तरस्था ।।

[५६]

शिबिका :-

हैमी तूलासनविलसिता कोमला सोपवर्हा
रत्नज्योतिर्ज्वलितनिखिला ऽऽभ्यन्तरस्वप्रदेशा ।।
पुंभिर्वाह्या विनयविनतैरेकचित्तैश्चतुर्भि-
र्विष्णो प्रीत्यै भवतु शिविका कल्पितेयं मया ते ।।

[५७]

सिंहासनम् :—

पुष्पाकीर्णं कनककलितं सज्जितं वेदिमध्ये
नानारत्नोत्खचितममलं पादपीठोपपन्नम् ।

नम्रोत्तुङ्गैः फणिपतिशिरोमण्डलैः शोभमानं
शौरे सिंहासनमधिवसेर्भोगिभोगावनद्धम् ।।

[५८]

पाद्यम्—

कृत्वा वैभातिकविधिवरं स्वर्णदीपुण्यतीर्थे
शुद्धं गाङ्गं शुभजलमिदं स्वाहृतं स्वर्णकुण्डयाम् ।।
दिव्यैः पुष्पैः सुरवनभवैर्वासितं सत्सुगन्धि
पाद्यं पुण्यं तव चरणयोः श्रीपते कल्पयामि ।।

[५९]

अर्घः—

दर्भैः पुष्पैर्यवतिलजलैः श्यामदूर्वाङ्कुरैश्च
गव्यैः क्षीरैर्दधिघृतयुतैः सर्षपैर्गौरवर्णैः ।।
रम्भा शुभ्राक्षतकतुलसीमञ्जरीभिः सनाथः
स्वर्घोऽयं तेऽमृत विरचितो दक्षिणावर्तशङ्खे ।।

[६०]

आचमनीयम्—

शीतं सान्द्रीकृतमृगमदं दिव्यकर्पूरगन्धं
गङ्गानीतं पिहितममलं सत्पिधानं विशुद्धम् ।।
कङ्कोलाढ्यं परिमलमयं वार्युपस्पर्शनीयं
प्रीत्यै नारायण तव मया कल्पितं स्वीकुरुष्व ।।

[६१]

मधुपर्कः—

स्वच्छं सर्पिर्दधि मधु शुभे रत्नपात्रे निधाय
लक्ष्मीनारायण तव मुदे मौक्तिकेनापिधाय ।।
स्वीकर्तव्यो मधुरमधुपर्को गवालम्भशून्यः
पूजारम्भे मनसि रचितो विध्यनुष्ठानसिध्यै ।।

[६२]

उद्वर्तनम् :-

कङ्कोलाढ्यं छुरितरजनीकुङ्कुमप्राज्यचूर्णं
सिद्धार्थानां मसृणमसृणं दीर्घशूकोद्भवं च ।।
पिष्टं पात्रे कनकरचिते स्थापयन्नाभिगन्धं
मन्दोष्णं ते जलमपि ददे स्नातुमुद्वर्त्य गात्रम् ।।

[६३]

तैलाभ्यङ्ग :-

तैलं दिव्यैः कुसुमनिवहैर्वासितं सत्सुगन्धि
नाकस्त्रीणां मृदुकरतलैर्लालितं गात्रसंधि ।।
संगुञ्जद्भिर्विततमभितो गन्धलुब्धैर्द्विरेफै-
रभ्यङ्गार्थं तव विरचये देहशोभाभिवृध्यै ।।

[६४]

पञ्चामृतस्नानम् :-

दुग्धं क्षौद्रं सदधिसघृतं शर्कराभिः समेतं
हैमामत्रेष्वभिषवविधौ नाथ पञ्चामृतं ते ।।
वार्भिः पूर्णैः कनककलशैः शाकमभ्याहरामि
स्नात्त्वा प्रीतो भव सुरवर श्रीयुतो नित्यमेव ।।

[६५]

स्नानीयं, वस्त्रं ब्रह्मसूत्रं च—

सैलोशीरामरतरुसुमामोदमामोदकारि
वारि स्नातुं विरचितमिदं नाथ नित्यं प्रसीद ।।
सप्रावारं सदशममलं पीतमेतद् दुकूलं
दत्तं प्रीत्या विभृहि भगवन् साधु सब्रह्मसूत्रम् ।।

[६६]

पादुकाः—

रत्नाकीर्णं कनककलितं मञ्जुलं नातिभारम्
ईषत्पुष्प्यत्कमलकलिकाकारमुद्रासुशोभम् ।।

लक्ष्मीनारायण तव मुदे पादुकायुग्ममेतत्
त्वत्पादार्हं रचितमतुलं नाथ पादौ निधेहि ।।

[६७]

केशशोषणादि—

सामोदेऽस्मिन् मलयजसमित्सिद्धशुद्धे समिद्धे
दीप्ताङ्गारे मणिविरचिताङ्गारधानीस्थितेऽग्नौ ।।
केशान् संशोषय घनरुचः स्कन्धपर्यन्तलम्वान्
स्निग्धान् कालागुरुकसुरभीन् कङ्कतीभिःप्रमार्जन् ।।

[६८]

अञ्जनम् :—

सौवीरोत्थं मणिविरचिते सच्छलाकाग्रदेशे
कोशीकृत्याऽऽहितमतिहितं कज्जलं स्निग्धमेतत् ।।
नाथ प्रीत्यै परिमलमयं शीतलं कल्पयित्वा
दत्तं भक्त्याञ्जय नयनयोस्तेऽङ्गसङ्गोस्य भाग्यात् ।।

[६९]

आभूषणानि :—

मञ्जीरे द्वे पदयुगलयोरङ्गुलीषूर्मिकाश्च
गुल्फस्थाने तव विरचितौ हंसकौ शोभनीयौ ।।
कटयां दत्ता कनककलिता श्रृङ्खला रत्नरम्या
वैकुण्ठेभिः प्रमदमतुलं याहि पद्मासनाथः ।।

[७०]

मुक्ताहारो लसतु हृदये नाथ पद्मानिवासे
श्रीवत्साङ्के सुविपुलतमे प्रोन्नते चातिपीने ।।
कण्ठे ग्रैवेयकमजित ते निर्मले कम्बुकल्पे
नानारत्नै रचितममलं देव दत्तं प्रसीद ।।

[७१]

केयूराणि चतुर्षु वाहुषु मया दत्तानि हैमानि ते
नानारत्नसमुज्ज्वलानि भगवन् भक्त्या गृहाण प्रभो ।।

नाडीषु प्रतिवर्णहीरवलयाः सौवर्णपट्टाङ्किता
विश्वाधार कराङ्गुलीषु रचिता नानाविधा ऊर्मिकाः ।।

[७२]

कुण्डले :—

प्रोद्यत्पीनकपोलकान्तिविलसत्स्वच्छप्रभाभास्वरे
सौवर्णे मकराकृती मणिमये श्रुत्योः शुभे कुण्डले ।।
मद्भक्त्या परिकल्पिते सुललिते देवेज्यदैत्येज्यभे
श्रीश त्वन्मुखचन्द्रतो दुरुधरा योगावहे स्वीकुरु ।।

[७३]

किरीटम् :—

सद्रत्नोत्स्वचितं सुवर्णरचितं दिव्यप्रभाभास्वरं
तेजोमण्डलमादधद् विधिबुधैः सम्यक् प्रतिष्ठापितम् ।।
प्रत्यग्रं सुपरिष्कृतं जनमनोदुर्धर्षमत्युल्वणं
शीर्षे देव किरीटमाहितमिदं भक्त्या मया कल्पितम् ।।

[७४]

चरणादिषु चन्दनादिरागः—

रेखाचक्रयवाङ्कुशध्वजलसन्मीनं सरोजान्वितं
रक्तं पादतलद्वयं भगवतः पद्मोदराभं शुभम् ।
पद्मापाणितलार्चितं करतलस्यापि द्वयं शर्मद–
मष्टाभिश्च सुगन्धिभिर्विरचितैः सच्चन्दनैश्चर्चये ।।

[७५]

तिलकानुलेपनादि–

श्रीखण्डान्वितकेसरं सुमसृणं गोरोचनासंयुतं
मृद्वङ्ग्याङ्गनया सुरालयनदीकीलालघृष्टं शनैः ।।
गन्धं ते रचयामि दीपकलिकाकारं ललाटान्तरे
तत्पश्चात् सकले कलेवरवरे लिम्पामि भक्त्या हरे ।।

[७६]

रत्नाद्यक्षता:—

नानारत्नयवा यवा दधियुता मुक्ताक्षता: पीतनै:

सद्गन्धै: सुरभीकृता: समुचिता: कृष्णास्तिला: संचिता: ।।

सावीरा: सिततण्डुला: परिमलै: पूर्णाश्च शोभाविधौ

स्वीकार्या भगवँस्त्वदर्थमधुना भक्त्या मया कल्पिता: ।।

[७७]

पुष्पाणि:—

जात्यास्फोटा- तिलक- दमनाशोक- पुंनाग- चम्पै-

र्यूथी-जम्बू- वकुल- गिरिजा- पाटला- कुन्द- विल्वै: ।।

सन्मन्दारै: कुमुद- कमलैर्मञ्जरीभिस्तुलस्या

लक्ष्मीनारायण विरचिता प्रीतये तेस्तु पूजा ।।

[७८]

वासन्तीभि: शतदल- जपा- सप्तला- वन्धुजीवै:

स्वर्णाम्भोजै: करकसुमिकावज्रपुष्पैर्बुकैश्च:

तत्तत्कालोद्भवसुमलतापल्लवैर्वल्लरीभि-

र्वैकुण्ठ त्वां प्रमुदितमना: पूजयामीह सम्यक् ।।

[७९]

माल्यादि:—

माल्यं वैंकक्षिकं तद् घनकुसुमचितं नामतो यल्ललाम

प्रालम्बं भ्रष्टकं सद् बहुविधकुसुमं वैजयन्तीसनाम ।।

सापीडा कापि मालाऽमरमधुरचिता नन्दिनीमञ्जरीभि:

प्रीतिं कुर्वन्तु विष्णोर्भृगुपतितनयासंयुतस्येह नित्यम् ।।

[८०]

आवरणपूजा:—

पूर्वस्यां वासुदेवं यमदिशि कुसुमै: शेषसंकर्षणाख्यं

देवं प्रद्युम्नसंज्ञं वरुणदिशि सुरं चोत्तरत्रानिरुद्धम् ।।

आग्नेये शान्तिनाम्नीं श्रियमथ वरुणप्रेतपत्यन्तराले

वायौ सारस्वतीं ते रतिमपि भगवन् पूजये शैवकोणे: ।।

[८१]

चक्रं पूर्वत्र, शङ्खं ज्वलनदिशि, गदां दक्षिणस्यां च रक्षः-
कोणे पद्मं, प्रतीच्यां सकलमणियुतं कौस्तुभं पूजयित्वा ।।
वायव्ये दिग्विभागे मुसलमसिवरं पूजयन्नुत्तरत्र
विष्णो वन्यां स्रजं ते शिवदिशि विविधैरर्चये चोपचारैः ।।
[८२]

पूर्वस्यां ध्वजमर्चये तव मुदे तार्क्ष्यं च याम्यां दिशि
वारुण्यां दिशि शङ्खनामकनिधिं पद्मं निधिं चोत्तरात् ।।
विघ्नेशं शिखि देवके च कुणपे कोणेयजाम्यार्यकं
दुर्गां मारुतके, शिवस्य दिशि वै विश्वग्युतं सेनकम् ।।
[८३]

पूर्वस्यां दिशि वज्रपाणिममरश्रेष्ठं गजे संस्थितं
छागस्थं स्वहरिद्गतं हुतभुजं शक्तिं दधानं करे ।।
याम्यां दण्डधरं सदोद्यतकरं कृष्णे लुलाये स्थितं
नैर्ऋत्यां निकषासुतं पुरुषगं खड्गान्वितं पूजये ।।
[८४]

देवं पाशधरं सदा मकरगं सौम्यं प्रतीच्यां स्थितं
वायव्ये हरिणस्थितं ध्वजधरं वायुं, दशाश्वे रथे ।।
तिष्ठन्तं सगदं वराङ्कितकरं सोमं भजे सौम्यतः
शम्भुं शूलधरं वृषध्वजवरं पूर्वोत्तरे पूजये ।।
[८५]

पूर्वेशानदिगन्तरे सुरवरं पद्मासने हंसगं
शेषं निर्ऋतिपश्चिमान्तरगतं सीरध्वजं सत्फणम् ।।
इन्द्रादीन् दशदिक्पतीन् दशदिशोऽधिष्ठाय सम्यक् स्थितान्
विष्णो त्वत्समवाप्तभूरिविभवांस्त्वत्पूजने पूजये ।।
[८६]

मन्त्राक्षरन्यासः—

अष्टार्णस्य मनोश्चतुर्मुखमुखाद् व्यक्तस्य दिव्यात्मनः
श्रीनारायणदैवतस्य पदवद्गायत्रिकाच्छन्दसः ।।

श्रीँ वीजस्य हँकीलकस्य विनियुक्तास्यापवर्गादिषु
त्वत्प्रीत्यै भगवन् षडङ्गसहितं न्यासं करोम्यात्मनि ।।

[८७]

मन्त्राक्षरमूर्तिध्यानम्ः—

सिन्दूरप्रभकुन्दवर्णमरविन्दाभं कदम्बत्विषं
वन्धूजीवकवर्णकं सुविशदं काश्मीरकान्तिं ततः ।।
विष्णो पद्महरिन्मणिच्छविधरं त्वामष्टवर्णात्मकैः–
रष्टाभिः शुभमूर्त्तिभिः प्रविततं संचिन्तये ऽहं क्रमात् ।।

[८८]

मन्त्राक्षरमूर्तिपूजा—

मध्ये त्वां प्रणवात्ममूर्तिममलं दोर्भिश्चतुर्भिर्युतं
शङ्खं चक्रगदे महोत्पलमलं दक्षोर्ध्वहस्तक्रमात् ।।
प्रादक्षिण्यतया दधानमजितं सिन्दूरवर्णोज्ज्वलं
भक्त्या संपरिपूजये ऽनिशमहं मन्त्रार्णमूर्त्यर्चने ।।

[८९]

पूर्वस्यां तव वर्णमूर्तिषु सदा कुन्द्रप्रसूनप्रभं
चक्रं शङ्खगदे महोत्पलमलं दक्षोर्ध्वहस्तक्रमात् ।।
विभ्राणं परितः प्रदक्षिणतया विष्णुं चतुर्बाहुषु
भक्त्या सावरणं यजे कृतमतिः शुद्धं नकारात्मकम्

[९०]

मोवर्णात्मकमूर्तिमग्निविलसद्दिक्कोणमध्यस्थितं
चक्रं शङ्खगदे महोत्पलमलं दक्षोर्ध्वहस्तक्रमात् ।।
विभ्राणंः परितः प्रदक्षिणतया देवं चतुर्बाहुषु
विष्णुं त्वां परिपूजयामि सततं फुल्लारविन्दप्रभम् ।।

[९१]

याम्ये दिग्विषये चतुर्भुजलसच्छृङ्खारिकौमोदकी–
पद्मं दक्षकरोर्ध्वदक्षिणपरिक्रामं कदम्बप्रभम् ।।

नावर्णात्मकमूर्तिमच्युतमहं रत्नप्रभाभास्वरं
त्वां साङ्गावरणं समर्चितवतो मा मेऽस्तु मृत्योर्भयम् ।।
[६१]
नैर्ऋत्यां दिशि शङ्खचक्रकगदापद्मं चतुर्बाहुषु
प्रादक्षिण्यतया वहन्तमजितं दक्षोर्ध्वहस्तक्रमात् ।।
रावर्णात्मकदिव्यमूर्तिमनघं सद्बन्धुजीवप्रभं
त्वां साङ्गावरणं समर्चितवतो मा मेऽस्तु रक्षोभयम् ।।
[६२]
वारुण्यां दिशि शङ्खचक्रकगदापद्मं चतुर्बाहुषु
प्रादक्षिण्यतया दधानमनघं दक्षोर्ध्वहस्तक्रमात् ।।
यार्णात्मानमहस्करारुणरुचिं काश्मीरपङ्कप्रभं
साङ्गं सावरणं स्वभक्तसुखदं त्वां देव संपूजये ।।
[६४]
वायव्यां दिशि शङ्खचक्रकगदापद्मं चतुर्बाहुषु
प्रादक्षिण्यतया दधानमनघं दक्षोर्ध्वहस्तक्रमात् ।।
णावर्णात्मकमुत्तमामरवरैः संसेवितं माधवं
त्वां साङ्गं परिपूजयामि भगवन् पद्मोदराङ्गच्छविम् ।।
[६५]
त्वां गारुत्मतकान्तिमुत्तरदिशामाश्रित्य लोकस्थितिं
पश्यन्तं दरचक्रसद् गदमहापद्मं चतुर्बाहुषु ।।
प्रादक्षिण्यतया वहन्तमतुलं साङ्गं सदा सुन्दरं
भक्त्या संपरिपूजयाम्यहरहः शान्तं यकारात्मकम् ।।
[६६]
ऐशान्यां प्रणवात्ममूर्तिममलां दोर्भिश्चतुर्भियुतां
शङ्खं चक्रगदे महोत्पलमलं दक्षोर्ध्वहस्तक्रमात् ।।
प्रादक्षिण्यतया सदा धृतवतीं सिन्दूरवर्णोज्ज्वलां
सर्वासामपि पूजये प्रतिनिधिं मन्त्रार्णमूर्त्यर्चने ।।
[६७]

मन्त्राक्षरमूर्त्यावरणदेवताः-

ओकारमूर्तौ प्रथमं षडङ्गं द्वितीयमष्टाक्षरमूर्तिपूजा ।।
श्रीवासुदेवादिगता तृतीया शान्त्यादिभिः संगदिता चतुर्थी ।।

[९८]

भवेत्तथेन्द्रादिभिरङ्गपूजाविधौ शुभा पञ्चमिकावृतिश्च ।।
चक्रादिपूजास्तु तवार्चनायां षष्ठ्यावृतिः पुण्यतमागमोक्ता ।।

[९९]

नकारमूर्तिपूजायां पञ्चमावरणार्चनम् ।।
ध्वजादिपूजनैर्भूयात् षष्ठमिन्द्रादिभिर्भवेत् ।।

[१००]

रतिरथ धृतिकान्ती तुष्टिपुष्टी स्मृतिश्च
तदनु च गदिते द्वे दीप्तिकीर्ती समन्तात् ।।
इति निगदितदेव्यः पूजिताः स्यु स्तृतीया ऽऽ-
वृतिषु विहितकल्पाः स्वच्छमोकारमूर्तौ ।।

[१०१]

ध्वजादिपूजा गदिता चतुर्थावरणे प्रिया ।।
पञ्चमावरणे प्रोक्तमिन्द्रादिसुरपूजनम् ।।

[१०२]

नाकारमूर्तौ प्रथमं षडङ्गार्चनमुत्तमम् ।।
अष्टमूर्त्यर्चना ख्याता द्वितीया ऽऽ वृतिरत्र हि ।।

[१०३]

रत्यादयस्तृतीये स्युर्लोकपालाश्चतुर्थके ।।
शिष्टावरणपूजायां पूर्ववत्परिकल्पना ।।

[१०४]

राकारमूर्तौ प्रथमं षडङ्गपरिपूजनम् ।।
अष्टार्णमूर्तिपूजा स्याद् द्वितीयावरणार्चनम् ।।

[१०५]

श्रीभूमायामनोन्मन्यो ह्लीं रतिस्तुष्टिमोहिनी ।
महामाया योगमाया तृतीयावरणे स्मृताः ।।
[१०६]
इन्द्रादिदशदिक्पालपूजा तुर्या ऽऽ वृतौ स्मृता ।
शिष्टावरणपूजायां पूर्ववत् परिकल्पना ।।
[१०७]
यकारमूर्तौ प्रथमं षडङ्गं परिकीर्तितम् ।
अष्टार्णमूर्तिपूजा स्याद् द्वितीयावरणे शुभा ।।
[१०८]
शङ्ख–चक्र-गदा–सीर–मुसलाऽशार्ङ्ग–मुद्गरौ ।
शूलं च कथितं पुण्यं तृतीयावरणार्चने ।।
[१०९]
इन्द्रदिभिर्लोकपालैश्चतुर्था ऽऽ वृतिकल्पना ।
शिष्टावरणपूजासु पूर्ववत् परिकल्पना ।।
[११०]
णाकारमूर्तिपूजायां षडङ्गं प्रथमावृत्तौ ।
द्वितीयावरणे पुण्या अष्टमूर्त्यर्चना स्मृता ।।
[१११]
तृतीयावरणे प्रोक्ताः शेषवासुकितक्षकाः ।
कर्कोटकः पद्ममहापद्मौ च द्वारपालकः ।।
[११२]
कुलीरकश्च शङ्खश्च नागा अन्ये च सर्वशः ।
इन्द्रादिभिश्चतुर्थं स्यात् पूर्ववच्छेषकल्पना ।।
[११३]
अन्त्ययार्णप्रपूजायां षडङ्गं प्रथमं स्मृतम् ।
अष्टमूर्त्यर्चना प्रोक्ता द्वितीयावरणे शुभा ।।
[११४]

शान्त्यादिदेवतापूजा तृतीयावरणे स्मृता ।।
ध्वजादिपूजा तुर्या स्यादावृतिश्चात्र पूजने ।।
[११५]
मत्स्यः कूर्मो वराहश्च नृसिंहो वामनस्तथा ।।
रामास्त्रयश्च कल्की च अनन्तः पञ्चमावृतौ ।।
[११६]
शेषादिनागपूजा तु षष्ठावरणके स्मृता ।।
सप्तमे लोकपालार्चा वज्राद्यर्चाष्टमे शुभा ।
[११७]

अङ्गपूजाः—

नत्वा विष्णुं पदकमलयोः पूजनं ते करोमि ।
भक्त्या श्रीमाधवमभिनतो जानुनी पूजयामि ।।
देवं श्रीकेशवमतिनतौ गुल्फकावर्चयामि ।
नत्वोरू द्वे मधुहनमहं नाथ संपूजयामि ।।
[११८]
श्रीगोविन्दं मनसि विदधद्गुह्यमापूजयामि ।।
विश्वात्मानं कटिमभिनमन् भक्तितः पूजयामि ।।
नाभेः पूजां तव विरचये पद्मनाभं विचिन्त्य ।
कुर्वे विष्णोरुदरयजनं विश्वमूर्तिं प्रणम्य ।।
[११९]
हृत्पूजां ते मनसि परमात्मानमानम्य कुर्वे
श्रीकण्ठं त्वां हृदि विनिदधत्कण्ठपूजां करोमि ।।
बाह्वर्चां तेऽजित विरचये क्षत्रियान्तं विचिन्त्य
सर्वान्तर्यामिणमभिनमन् वक्त्रपूजां प्रकुर्वे ।।
[१२०]
त्रैलोक्यदीपकं नत्वा नेत्रपूजां करोमि ते ।।
ललाटं पूजये सर्वजनपालकमानमन् ।।
[१२१]

नारायणं प्रणम्याथो शिरःपूजां करोमि ते ।
हरिमानम्य सर्वाङ्गपूजनं प्रकरोम्यहम् ।।
[१२२]

धूपः—

लाक्षाश्रीवासलोहैः पुरसुरकुसुमै धूपकैः कृत्रिमैश्च
सिह्लैः कस्तूरिकाभिः सविधुमलयजैः सर्जकैर्गोघृताक्तैः ।।
दीप्ते वह्नौ हसन्त्यां मणिचितकनकैः कल्पितायां निधाय
धूपैः पूजागृहं ते परिमलवहलैः सर्वदा धूपयामि ।।
[१२३]

दीपः—

दिव्यैर्गोपीथसान्द्रैरतिशयविशदैः स्वच्छकार्पासजातैः
स्वर्णामत्रे प्रदीप्तैः कनकमयशिखैः सर्वथा दर्शनीयैः ।।
निधूमैरङ्गशोभाप्रगुणितकरणे साभिमानैः सुदीप्तै-
र्गात्रं प्रेम्णा त्वदीयं विमलमपि सदा दीपयामि प्रदीपैः ।।
[१२४]

आरार्तिकम्ः—

दीपान् सत्तूलमूलान् मणिवरचिते पात्रवर्ये विधाय
ज्वालामालाललामीकृतयजनगृहाभ्यन्तरान् संविधाय ।।
द्वाभ्यां दोर्भ्यां गृहीत्वा द्युतिजितकनके भ्रामयित्वा शरीरे
स्वच्छं स्वारार्तिकं ते विदधति मयि भोः स्यात्कृपापूर्णदृष्टिः ।।
[१२५]

नैवेद्यादिभोज्यजातम्ः-

कूरैः सूपैः सदाज्यैर्दधिमधुपयसा संकुलै,'पायसैस्त्वां
शाकैः सिद्धैरनेकैः सकृशरवटकैस्तेमनैः सोपदंशैः ।।
रत्नानां काञ्चनानां सुविशदमसृणस्थालिकासूपनीतै-
र्भक्ष्यैर्भोज्यैश्च लेह्यैः सुमधुररसरसैः प्रीणये चोष्यपेयैः ।।
[१२६]

पूरीसंयावफेणीमधुमधुरमहापूपपलड्डूकगोजी-
पूपामिक्षाढ्यमोदोत्तमरसवरिकाकूर्चिकाशष्कुलीभिः ।
मस्त्वाढ्यैः पिच्छिलैस्तैः सलवणदधिभी राजिकाचूर्णपूर्णैः
स्वामिस्त्वां प्रीणयेहं सरसशिखरिणीयुक्तसुस्वाद्यखाद्यैः।।

[१२६] णी

भुञ्जानस्य भगवतो ध्यानम्—

स्वासीनं रत्नपीठेऽमृतमधुररसं भोज्यमस्मत्प्रणीतं
भुञ्जानं संविभाज्यैः स्मितलसितमुखं चामरैर्वीज्यमानम् ।।
त्वां ध्यायन् नाथं चित्ते मनुमपि शनकैः संजपन् भक्तिनम्रः
स्वात्मानं त्वद्विलीनं क्षणमिह मनसा भावये सावधानः।।

[१२७]

आचमनमुखशोधनादि—

त्वत्पाणौ जाप्यमेतत् प्रमुदितहृदयो भक्तिनम्रोऽर्पयित्वा
दत्त्वोपस्पर्शनार्थं जलमपि विमलं चूर्णमुद्वर्तनीयम् ।।
कीलालं कर्करीस्थं मुखकरयुगलक्षालनार्थं प्रकल्प्य
गण्डूषार्थं नवीनं कनकविरचितं पात्रकं चार्पयामि ।।

[१२८]

पानीयं जलम्—

प्रोत्तुङ्गोत्तुङ्ग–शैलोत्तमशिखरवरोत्पन्नसंन्निर्झरेभ्यः
शैलाच्छैलान्तरत्रोत्पतननिपतनोच्छेदपथ्योदकेभ्यः ।।
आनीताः स्वर्गकुम्भे विमलतमपटे पाविता आप एताः
कर्कर्य्यां रत्नमय्यां सुरवर पुरतः स्थापिताः
स्वीक्रियन्ताम् ।।

[१२९]

फलानि—

रम्भानारङ्गजम्ब्वर्गंड – करक–भवाक्षोट–पिस्तामृतानि
काश्मीरीवाप्यपिण्डासधरणिचणकारुष्कराणीङ्गुदीश्च ।।
सीतावातादवीरारु–पनसलवलीश्रीफलाद्यानि विष्णो
त्वत्प्रीत्यर्थं रसालं शतमुखमपि भो अग्रतः स्थापयामि ।।

[१३०]

ताम्बूलम्—

मुक्ता सच्चूर्णपूर्णं खदिरसुरसुमैलादिसंयुक्तमेतत्
कस्तूरीचन्द्रगन्धं क्रमुकविलसितं स्थापितं सत्करण्डे ॥
ताम्वूलं दिव्यवाटीभवमिदमतुलं कोमलं लास्यकारि
दत्तं विष्णो मया ते वदनपरिमलप्रीणनार्थं प्रसीद ॥
[१३१]

उपायनानि—

पूजासाङ्गुण्यसिद्ध्यै तव नवकनका रत्नराशिप्रपूर्णा
मालालङ्कारपीताम्वरवरवहला सत्वसूनाःस्रजश्च ॥
गोभूधान्यादियुक्ता सकलशुभफला दक्षिणाः संप्रदत्ता
भूत्वाभिस्तुष्टहृष्टो मयि शरणगते नाथ नित्यं प्रसीद ॥
[१३२]

छत्रम्—

स्वच्छं कान्तं परार्घ्यं द्युतिविजितशरत्पूर्णिमाचन्द्रविम्वं
मुक्ताजालीसनाथं समुचितखचितस्वर्णसद्रत्नकुम्भम् ॥
हेम्ना दण्डेन युक्तं रजतविरचितैर्वङ्क्रिवृन्दैरुपेतं
श्वेतं दिव्यातपत्रं तव शिरसि मया कल्पितं स्वीकुरुष्व ॥
[१३३]

चामरे:—

सुश्वेते रत्नदण्डे शरदि विकशितस्वच्छकाशावभासे
दिव्ये स्फीते विशुद्धे मृदुतमललिते चामरे वीजयामि ॥
दीने सद्भक्तिहीने मयि भव सुमुखो नाथ भो अङ्कलीने
स्वामिन् नान्या गतिर्मे भवजलधिगतं क्षिप्रमेवोद्धरस्व ॥
[१३४]

दर्पण:—

वृत्तं मार्तण्डविम्वप्रभमतिविमलं मञ्जुलं मङ्गलं सत्
खण्डं रत्नस्य शुभ्रं सुविमलमतुलं निर्मितं टङ्कयित्वा ।
आदर्शं स्वर्णवद्धं वरद तव मुखं प्रेक्षितुं कल्पयामि
दृष्ट्वा तत्र स्वकीयं स्मितलसितमुखं प्रेमतोऽस्माँश्च पश्य ॥
[१३५]

नीराजना:—

स्वीयज्योतिःप्रदीप्ते मणिगणरचिते पात्रवर्ये निधाय
कर्पूरस्य प्रदीपाञ् शशिधवलशिखान्, साज्यसन्तूलदीपान्॥
सत्पात्रे शातकुम्भे कनकमयशिखान्, भ्रामयित्वा क्रमेण
स्वामिन् नीराजनेयं सपदि विरचिता मोदमाधेहि चित्ते ॥

[१३६]

अश्व:—

तुङ्गः सल्लक्षणाढ्यः पवनसजवनः सत्कुलीनो विनीतः
सत्पर्याणः सुपीठः प्रथितगुणगणः शुद्धभूषः सुहेषः ॥
लक्ष्मीवान् सत्खलीनो गगनगतिरिवाऽऽस्कन्दिते लक्ष्यमाणो
दिव्योऽश्वःकल्पितोऽयं तुरगशतयुतस्तं समारुह्य पश्य ॥

[१३७]

गजेन्द्रः—

प्रोतुङ्गःकल्पनाढ्यः खचितमणिपरिस्तोमसंवीतगात्रः
शुद्धस्यैरावतस्य प्रथितकुलभवः स्वर्णसंबद्धदंष्ट्रः ॥
लक्षण्यः कान्तकुम्भो विद्रुवमथुमदः शूर्पकर्णो गजेन्द्रो
दत्तः स्वाधोरणोऽयं गजगणसहितो नाथ नित्यं प्रसीद ॥

[१३८]

पुष्परथ:—

मुक्ताजालीसनाथं सुललितमृदुलस्वासन सोपवर्हं
सुग्रीवाद्यैश्चतुर्भिर्हयऋषभवरै संयुतं सद्वितानम् ॥
नानासंपत्समृद्धं स्वजनपरिवृतं स्फूर्तिमत्सूतयुक्तं
दत्तं पुष्यं रथं ते जलनिधितनयावीक्षितं संगृहाण ॥

[१३९]

चतुरङ्गादिसैन्यम्:—

भूनौकाकासवासं पदिकहयगजस्यन्दनाढ्यं समृद्धं
नानाशस्त्रास्त्रविद्यापरिचितवलवद्वीरवृन्दाभिबन्द्यम् ॥
दृप्तैः संशप्तकैः स्वैरहमहमिकया संकुलैर्व्याप्तदुर्गं
दिक्प्रान्तोद्दण्डधर्षत्पटुपटहरवं नाथ सैन्यं गृहाण ॥

[१४०]

क्रीडोद्यानम् —

सत्पुष्पामोदपूर्णं मलयजपवनान्दोलिसन्मञ्जरीभि-
र्युक्तं रम्यैर्निकुञ्जैः किसलयवलयैर्वल्लरीतल्लजैश्च ॥
हंसालीव्याप्तवापीविलसिततरणीशोभितं निर्झराढ्यं
लीलोद्यानं मनोज्ञं खगरवमधुरं कल्पयामि प्रसीद ॥

[१४१]

वातव्यजनम्—

व्याप्तं पीतैः परागैरतिशयशिशिरं क्षौमजालीप्रवीतं
तालीपत्रं दुकूलैरुपवृतममलं तालवृन्तं विशालम् ॥
सामोदं शोभनीयं मृदुपवनयुतं शीतलं स्वर्णदण्डं
तुभ्य दत्तं मयैतत् सुरवधुकरतो नाथ भो वीजयस्व ॥

[१४२]

वेदपारायणम्—

स्वामिन् पूजाविधाने श्रवणपुटकयोस्ते पदाद्या घनान्ताः
ख्याता येष्टौ विकारा द्विजगणपठिताः संहितानां समूलाः॥
वेदानां ब्राह्मणानि श्रुतिशतमधुराण्यृग्यजुःसामनाम्नां
साङ्गोपाङ्गानि सर्वाण्यपि तव पुरतः श्रावयामि प्रसीद ॥

[१४३]

शुकपिकादिविनोदः

भुक्त्वा पीत्वा प्रसन्नाञ्छुकपिकचरणायोधनान् मेषलावान्
दान्तानक्षान् ग्लहाढ्यान् प्रतिकितवयुताञ्छारिसच्छारि-
पट्टान् ॥
मल्लान् व्यायामफुल्लाँल्लघुतनुकृतिभिः स्फूर्तियुक्तान् विनीतान्
यच्छाम्यन्तर्विनोदो भवतु तव महानेभिरीश प्रसीद ॥

[१४४]

आन्दोलिका—

पुष्पस्रग्दामवीला मधुकररणिता धूपिता पुण्यधूपै-
र्दिव्या तूलासनाढ्या सुरवरवनितालोभनीयाऽतिरम्या ॥

मुक्ताजालीविताना जलनिधितनयातुल्यभूषावयोभि-

दासीभिर्दोल्यमाना हृदि भवतु सदाऽऽन्दोलिका प्रीतये ते ।।

[१४५]

नृत्यगीतवाद्यादि—

डिम्बं डिम्बं सुडिम्बं पटुपटहरवाक्रान्तदिङ्मण्डलानां

क्रम्मं क्रम्मं सुक्रम्मं विलसितमधुरं स्वैरमुन्नर्तनानाम् ।।

हाहा–हूहू–घृताचीमुखसुरवनिताकिन्नरीतुम्बुरूणां

चित्रं तौर्यत्रिकं ते भृशमनिशमहं कल्पयामि प्रसीद ।।

[१४६]

स्तुतिः—

ब्रह्मा शम्भुः कुमारः फणिपतिरनिशं स्वैरनेकास्यसंघैः

स्तुत्वा स्तोत्रैरसंख्यैस्तव पदकमलं ध्यायमाना अनन्याः ।।

स्तोतुं नित्यं यतन्ते परमहमधुना प्राञ्जलिर्भक्तिनम्रः

स्वान्ते त्वामादधानः क्षणमिह भगवन् स्तौमि नाथ प्रसीद ।।

[१४७]

प्रदक्षिणाः—

कृत्वा त्वत्परितः परिक्रमविधिं पापौघविध्वंसनं

नुत्वा भक्तिभरेण ते पदयुगं त्रैलोक्यसंपत्प्रदम् ।।

नाथ त्वां क्षणमादधत् स्वहृदये स्वर्गापवर्गप्रभुं

मायाजालमिमं प्रपञ्चमधुना तुच्छं सदा भावये ।।

[१४८]

नमस्कारः—

रेखावज्रयवाङ्कुशध्वजलसत्पद्मं सरोजप्रभं

नाथ त्वत्पदपङ्कजं सुललितं पद्मालयालालितम् ।।

भक्ताभीष्टपुमर्थदं श्रुतिगणैः संस्तूयमानं सदा

ध्यानावस्थितयोगिभिश्च सततं ध्येयं नमस्कुर्महे ।।

[१४९]

पुष्पाञ्जलिः—

कण्ठे पद्मकृतां स्रजं तव मुदे दत्त्वा सदाऽऽमोदिनीं
चर्चित्वा तुलसीदलैः सकुसुमैः पादद्वयं हे प्रभो ।।
शीर्षेऽयं रचितः सुमैर्बहुविधैः पुष्पाञ्जलिः शर्मदः
श्रीश त्वं भव सुप्रसन्नहृदयो दासे मयि प्रेमतः ।।

(१४८)

वासभवनम्:-

धूपैर्धूपितमुल्लवणं जवनिकाच्छन्नं समस्थं शुभं
सोल्लोचं सुरसुन्दरीपरिवृतं साभोगमासेचनम् ।।
विष्णो वासगृहं मया विरचितं वैकुण्ठशोभावहं
तत्र त्वं वस मां स्मरन् परिचरं सेन्द्रैः सुरैः सेवितः ।।

(१४९)

पादसंवाहनम्:-

पादौ संवाहयन्तं सधवलवसनं मञ्चमाधिष्ठितस्य
न्यस्तौ हैमे सुपीठे गुरवर तव तौ कोमलौ श्रीसमृद्धौ ।
ज्ञानाभासेन पीनं गुरुबुधजनसत्सङ्गहीनं कुलीनं
पाणिं दत्वाऽवलम्बं दरहर तरसा नाथ मामुद्धरस्व ।।

(१५०)

पर्यङ्कादिः-

सन्तूलं सोपबर्हं परिमलवहलं शुद्धनीशारयुक्तं
सोल्लोचं सन्मसूरीविरचितरचनं प्रोज्ज्वलं रत्नदीपैः ।
पर्यङ्कं क्लृप्तशय्यं सितवसनवृतं निर्मितं हाटकेन
स्वीकर्तुं नाथ भूया यदि मयि सदयः किं न सिद्धं ततः स्यात्

(१५१)

ताम्बूलसिक्थशुद्धिः-

एकान्तस्थे विशाले प्रशमितपटहे शिष्टविश्रब्धदासे
सम्यग् लब्ध्वा विदायं चलितवति जने हेमपर्यङ्कमध्ये ।।

स्वापार्थं संप्रवृत्ते भवति मुखगतं शिष्टताम्बूलसिक्थं
शोद्धुं दत्ता गलन्ती शुभविमलजला सत्प्रतिग्राहयुक्ता ॥

(१५०)

भगवतः शयनं सुप्तस्य ध्यानं समाधिश्चः-

सुप्तं लक्ष्मीसनाथं सुखशयनगतं प्राप्तनिद्रावकाशं
कोटीब्रह्माण्डवृन्दं स्वजठरपिठरे बीजमात्रं दधानम् ।।
त्वां शेषस्तूयमानं श्रुतिनुतमजितं नाथचित्ते निधाय
स्वात्मानं सर्वदाहं क्षपितकलिमलं भावये त्वद्विलीनम् ॥

(१५१)

पुनः समाधिदार्ढ्याय पादादिमूर्धान्तध्यानम्:-

त्वत्पादौ छत्रसिंहासनचमरलसत्पद्मपव्यङ्कुशाङ्कौ
दिव्यौ पद्मोदराभौ ध्वजगजतुरगस्यन्दनस्वस्तिकाढ्यौ।।
आरक्तोत्तुङ्गचञ्चत्प्रवरनखरसज्ज्योत्स्निकाराजमानौ
वन्दारुस्वान्तसंस्थान्धतमसमिहिरौ पावनौ देव वन्दे ।।

(१५२)

यत्पादक्षालनीयं सुरसरिदुदकं मूर्ध्नि धृत्वा पुरारि-
र्भक्त्या साक्षाच्छिवोऽभूत् त्रिभुवनविदितो यो महै-
श्वर्यपूर्णः ।।
ध्यातुश्चित्पाप्मशैलप्रशमनभिदुरौ ध्यानयोगैकगम्यौ
त्वत्पादौ नाथ नारायण भृशमनिशं मानसे मे चकास्ताम् ॥

[१५३]

लक्ष्म्याः पद्मायताक्ष्याः स्फुरदमलरुचो विश्वजन्या जनन्या
मृद्वङ्ग्याः कोमलायाः करकिसलयसद्रोचिषा दीप्य-
मानम् ।।
अङ्के विम्पस्य भक्त्या विनयविलसितं श्रीसुसंवाह्यमानं
स्वान्ते मे सर्वदास्तां विबुधवरनुतं मञ्जुजानुद्वयं ते ।।

[१५४]

सौपर्णेंशे विशाले सुकठिनमृदुले शोभमानौ क्षुमाभा
ऊरू, व्यालम्बिपीताम्बरधररशनावलिगतं श्रोणि-
विम्बम् ।।
यत्रोत्पन्ने सरोजे सकलसुरकुलज्येष्ठ एव प्रसूतो
नाभिः, सद्हारमश्मोद्भवमणिकमुरो, भान्तु ते मानसेमे ।।

(१५५)

वक्षोऽधिष्ठानमेतत् सुरऋषभ महाश्रीविभूतेः सुकान्तं
ग्रीवेयं कौस्तुभोद्यद्द्युतिरुचिरवरा कम्बुकल्पाऽभि–
रामा ।।
क्षीराब्धौ मथ्यमाने मथनगिरिपरिभ्रान्तिनिर्यज्जलेन
लोकान् सर्वान् पुनाना मम हृदि सततं भान्तु ते
वाहवश्च ।।

(१५६)

चक्रं धारा सहस्रं मृदुकरलसितं पाञ्चजन्यं च शङ्खं
दिव्या कौमोदकीयं दशशतदलकं पद्ममेतत् सुगन्धि ।।
वन्यामालाऽनुगुञ्जद्भ्रमरपरिवृता कण्ठसंस्थो मणिश्च
त्वद्गात्रस्पर्शपुण्या मम हृदि सततं भान्तु विष्णो तवैते ।।

[१५७] क्त्र.

भृत्यत्राणार्थलीलाधृतवरवपुषो वल्गितं वक्त्रविम्बं
कर्णौ कान्तौ प्रलम्बौ कनकविरचिते कुण्डले संदधानौ ।।
पुष्टौ दीप्तौ कपोलौ श्वसितपरिमला नासिकोदारतुङ्गा
स्वास्यं ताम्राधराढ्यं स्मितलसितरदं भान्तु ते मानसे मे ।।

[१५८]

मेघाभं कुञ्चिताग्रं परिवृतमलिभिः कुन्तलं श्रीनिकेतं
चञ्चन्मीनद्वयाभं शुभनयनयुगं पद्मकोशावहासम् ।।
भ्रूयुग्मं भुग्नमध्यं सुबिनतकुटिलं कामकोदण्डकान्तं
स्वच्छः स्निग्धोऽवलोको मम हृदि नितरां भान्तु विष्णो
सदा ते ।।

[१५६]

स्वामिन् ध्येयप्रकाण्डं प्रहसितमतुलं भक्तहृत्तापनाशं
ताम्रोष्ठं कुन्ददन्तं स्मितविजितशरच्चन्द्रमुत्तुङ्गनासम् ।।
वल्गल्लीलावलोकप्रशमितभवरुग्व्यूहमास्यं मनोज्ञं
ध्याये नित्यं त्वदीयं, मुकुटमणिलसत् सुप्रभामण्डला-
ढ्यम् ।।

(१६०)

प्रयोजनैकदेशः—

ध्यानमिदं भगवंस्ते मदन्तकाले स्वयं समागत्य ।
दययावहितो भूत्वा मानसपटले प्रकाशयेः सम्यक् ।।

(१६१)

ध्यानान्ते वैश्वदेविकहोमबल्यादिक्रियाः-

स्मार्ते ऽग्नौ विधिना श्रृतेन हविषा हुत्वा ऽऽहुतीः संयत-
स्त्वत्प्रीत्यै भगवन् करोमि वलिभिस्ता वैश्वदेवीः क्रियाः।।
याभिर्नश्यति सद्गृहस्थविदितो यः पञ्चसूताभवः
पापौघो दिशि पूर्वतः समुदिते सूर्ये निशान्धं यथा ।।

(१६२)

वैश्वदेविकहोमान्ते नित्यहोमः-

गृह्याग्नौ विधिनाऽऽहितेऽन्ववहिते निर्धूमकेऽङ्गारिणि
श्रीखण्डागुरुभिः समुज्ज्वलशिखे चाकश्यमानत्विषि ।।
सद्राक्षं सतिलं मधुत्रययुतं सत्पायसं संस्कृतं
स्वाहान्तं मनुमुच्चरंस्तव मुदे जुह्वा जुहोम्यञ्जसा ।।

(१६३)

पूजासमाप्तेः पूर्वं कुलदैवतवन्दनाः-

पूजान्ते कुलदैवतस्य धरणीयुक्तस्य कोलाऽऽकृतेः
श्रीपादोत्तमपङ्कजद्वयवरे पुष्पाञ्जलीनर्पये ॥
त्वत्सायुज्यमभीप्सताऽच्युत मया श्रद्धादरानुष्ठितः
प्राप्नोतु त्वदनुग्रहादनुदिनं पूजाविधिः पूर्णताम् ॥

[१६४]

कर्मसमर्पणम्:-

कार्यैर्वाङ्मनसेन्द्रियैः प्रकृतितो बुद्ध्याऽनुसृत्याऽऽत्मना
हे नारायण यत्कृतं यदकृतं नित्ये तवाराधने
सर्वं त्वत्पदपङ्कजेऽर्पितवतो दासस्य मे मानसे-
ऽवश्यं स्यात् त्वदनुग्रहाद् विकसितोऽनासक्तियोगःपरः॥

(१६५)

अन्ते भगवद्वन्दनाः-

कोटीब्रह्माण्डनेतस्तव दृशि भगवान् क्वास्मि दिष्टापदिष्टः
क्वैते भक्ताः प्रबुद्धा नियतिपरिचितास्त्वत्कृपानन्दमग्नाः॥
कर्मद्वारा हि नारायण ननु कुरुते देव सेवामजस्रं
तस्मिन् कार्यानुकम्पा प्रभुवर भवता तर्हि चेन्मां गृहाण।

[१६६]

अर्चासाद्गुण्यस्य हृदि भगवद्वासस्य च प्रार्थनाः-

एषा भक्त्या तव चरणयोः कल्पिता देव पूजा
तां स्वीकुर्वन् वरद मयि हे नाथ नित्यं प्रसीद ॥
अर्चाकार्येऽच्युत विधिषु यन्न्यूनता वातिरेक-
स्तत्साद्गुण्यं दिश मनसि मे तेऽस्तु सानन्दवासः ॥

[१६७]

ग्रन्थोपसंहारः-

यत्मातापितृसेवनोत्तमफले दिष्टान्तशय्यास्थले
श्रीनारायणमानसार्चनविधेस्तन्त्रे निसर्गोज्ज्वले ।।
भक्तिप्रेरितबुद्धिसागरकृते स्वर्गापवर्गप्रदे
नित्योऽर्चाविधिरेष पूर्तिमगमत् तत् प्रीतये स्याद् हरेः ।।

[१६८]

यत्प्रीतिः प्रथिता जरान्धतमसब्रध्नप्रभाभासुरा
मृत्युच्छेदकुठारिका कलिमलप्रध्वंसितीर्थोदका ।।
या प्रत्यङ्मुखदृष्टिदा निगदिता हृद्ग्रन्थिसंभेदिनी
बाह्याभ्यन्तरसंशयापहरणी तस्मै नमो विष्णवे ।।

[१६९]

□

बुद्धिसागरपराजुलिविरचिता
भगवद्वरिवस्या समाप्ता

रक्षार्थं पञ्चायुधस्तोत्रपाठः—

स्फुरत्सहस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यम् ।।
सुरद्विषां प्राणविनाशि विष्णोश्चक्रं सदाहं शरणं प्रपद्ये ।।१।।
विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता ।।
तं पाञ्चजन्यं शशिकोटिशुभ्रं शङ्खं सदाहं शरणं प्रपद्ये ।।२।।
हिरण्मयीं मेरुसमानसारां कौमोदकीं दैत्यकुलैकहन्त्रीम् ।।
वैकुण्ठधामाग्रकराभिमृष्टां गदां सदाहं शरणं प्रपद्ये ।।३।।
रक्षोऽसुराणां कठिनोग्रकण्ठक्षतक्षरच्छोणितदिग्धधारम् ।।
तं नन्दकं नाम हरेः प्रदीप्तं खड्गं सदाहं शरणं प्रपद्ये ।।४।।
यज्ज्यानिनादश्रवणात्सुराणां चेतांसि निर्मुक्तभयानि सद्यः ।।
भवन्ति दैत्यास्तु विदीर्णकर्णाः शार्ङ्गं सदाहं शरणं प्रपद्ये ।।५।।

○

श्रीः

श्रीमन्नारायणसंक्षिप्तपूजाविधिः

ॐ श्रीगुरुभ्यो नमः

प्रातः कृत्यं विधाय यथावन्नद्यादौ स्नात्वासन उपविश्य भूतशुद्धि–प्राणायाम–न्यासजालं विधाय शालग्रामादिपीठे आधारशक्त्यादि पीठपूजां कृत्वाऽष्टदलेषु पीठशक्तीर्यजेत् । पूर्वादिक्रमेण ॐ विमलायै नमः २ । ॐ उत्कर्षिण्यै० २ । ॐ ज्ञानायै ० २ । ॐ क्रियायै ० २ । ॐ योगायै ० २ । ॐ प्रह्व्यै ० २ । ॐ सत्यायै ० २ । ॐ ईशानायै ० २ । मध्ये अनुग्रहायै ० २ । ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः इति पीठमन्त्रेण विष्णवे आसनं दत्वा अर्घ्यादिकं संपाद्य प्रणवात्मकं देहं विभाव्य मन्त्रमूर्ति हृदि स्मरन् मानसोपचारैः संपूज्य बहिः पूजामारभेत । ध्यानम्–

प्रोद्यत् प्रद्योतनमणिरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च युक्तम् ॥
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥